तस्मिंस्तीर्थे नरः स्नात्वा शुचिः प्रयतमानसः।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति मानवः॥")
जैनगणाधिपविशेषः। इति हेमचन्द्रः। १।३२॥
(वसुभेदः। यथा, मात्स्ये। ५। २१।
"प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः॥")

प्रभिन्नः, पुं, (प्र+भिद्+क्त।) चरन्मदहस्ती। तत्पर्य्यायः। गर्ज्जितः २ मत्तः ३। इत्यमरः। २।८।३६॥ भ्रान्तः ४ मदकलः ५। इति राजनिर्घण्टः॥ (यथा, रामायणे। २।१५।४६।
"ततो महामेघमहीधराभं
प्रभिन्नमत्यङ्कुशमत्यसह्यम्।
रामोपवाह्यं रुचिरं ददर्श
शत्रुञ्जयं नागमुदग्रकायम्॥"
तथा च महाभारते। ७। २७। २०।
"यथा नलवनं क्रुद्धः प्रभिन्नः षष्टिहायनः।
मृद्नीयात्तद्वदायस्तः पार्थोऽमृद्नाच्चमून्तव॥")
प्रकृष्टभेदविशिष्टे, त्रि॥ (यथा, ऋतुसंहारे।२।५।
"प्रभिन्नवैदूर्य्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः॥")

प्रभुः, पुं, (प्रभवतीति। प्र+भू+डुः।) विष्णुः। इति शब्दरत्नावली॥ (शिवः। यथा, महाभारते। १३। १७। ३१।
"हरश्च हरिणाक्षश्च सर्व्वभूतहरः प्रभुः॥")
पारदः। इति राजनिर्घण्टः॥ शब्दः। इति धरणिः॥

प्रभुः, त्रि, (प्रभवतीति। प्र+भू+"विप्रसंभ्यो ड्वसंज्ञायाम्।" ३। २। १८०। इति डुः।) अधिपतिः। तत्पर्य्यायः। स्वामी २ ईश्वरः ३ पतिः ४ ईशिता ५ अधिभूः ६ नायकः ७ नेता ८ परिवृढः ९ अधिपः १०। इत्यमरः। ३। १। ११॥ पालकः ११। इति शब्दरत्नावली॥ (यथा, भगवद्गीतायाम्। ५। १४।
"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः।
न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते॥")
नित्यः। इति धरणिः॥ शक्तः। इति नानार्थरत्नमाला॥ (यथा, कुमारे। ३। ४०।
"आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति॥"
श्रेष्ठः। यथा, मनौ। १०। ३।
"वैशेष्यात् प्रकृतिश्रैष्ठ्यात् नियमस्य च धारणात्।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः॥")

प्रभुता, स्त्री, (प्रभोर्भावः। प्रभु+तल्।) प्रभुत्वम्। ऐश्वर्य्यम्। इति हलायुधः। ४। १००॥

प्रभुभक्तः, पुं, (प्रभोर्भक्तः।) उत्तमघोटकः। यथा,
"प्रभुभक्ता भक्तिलाश्च कुलीनेषु कुलोत्कटाः॥"
इति शब्दचन्द्रिका॥
स्वाम्यनुरक्ते, त्रि। यथा, चाणक्यसंग्रहे।
"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः॥"

प्रभूतं, त्रि, (प्र+भू+क्तः।) प्रचुरम्। इत्यमरः। ३। १। ६३॥ (यथा, कलाविलासे। १।६।
"तत्राभूदभिभूतप्रभूतमायानिकायशतधूर्त्तः।
सकलकलानिलयानां धुर्य्यः श्रीमूलदेवाख्यः॥")
उद्गतम्। इति मेदिनी। ते, १२१॥ भूतम्। उन्नतम्। इति शब्दरत्नावली॥

प्रभूष्णुः, त्रि, (प्रभवतीति। प्र+भू+"ग्लाजिस्थश्च ग्स्नुः।" ३। २। १३९। इति ग्स्नुः।) क्षमः। शक्तः। इति हेमचन्द्रः। ३। १५५॥

प्रभृति, व्य, (प्र+भृ+क्तिच्।) तदादिः। यथा,
"ततःप्रभृति पितरः पितृसंज्ञान्तु लेभिरे॥"
इति तिथ्यादितत्त्वम्॥

प्रभेदः, पुं, (प्र+भिद्+घञ्।) भेदः। तत्पर्य्यायः। प्रकारः २ विशेषः ३ भिदा ४ अन्तरम् ५। इति जटाधरः॥ (यथा, सुश्रुते निदानस्थाने १० अध्याये।
"पित्तात्मको द्रुतगतिर्ज्वरदाहपाकस्फोटप्रभेदबहुलः क्षतजप्रकाशः॥"
स्फोटनम्। यथा, रघुः। ३। ३७।
"बभूव तेनातितरां सुदुःसहः
कटप्रभेदेन करीव पार्थिवः॥")

प्रभ्रष्टकं, क्ली, (प्र+भ्रंश्+क्तः। ततः स्वार्थे कन्।) शिखालम्बिमाल्यम्। चूडातो लम्बमानमाल्यम्। इत्यमरभरतौ। २। ६। १३५॥

प्रमत्तः, त्रि, (प्रमाद्यति स्मेति। प्र+मद्+गत्यर्थेति क्तः। नध्याख्येति नत्वाभावः।) प्रमादी। अनवधानतायुक्तः। यथा,—
"मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जड़म्।
प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्म्मवित्॥"
इति श्रीभागवते १ स्कन्धे ७ अध्यायः॥
"मत्तं मद्यादिना। प्रमत्तमनवहितम्। उन्मत्तं ग्रहवातादिना। जड़ं अनुद्यमम्। प्रपन्नं शरणागतम्। विरथं भग्नरथम्।" इति श्रीधरस्वामी॥
अपरप्रमत्तो यथा,—
"सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥
स च राज्ञा नाज्ञानयितव्यः। यथा,—
"मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाज्ञानयेन्नृपः॥"
इति मिताक्षरा॥

प्रमथः, पुं, (प्रमथतीति। प्र+मथ्+अच्।) घोटकः। शिवपारिषदः। इति शब्दरत्नावली॥ स च षट्त्रिंशत्कोटिसंख्यकः। यथा,
"षट्त्रिंशत्तु सहस्राणि प्रमथा द्विजसत्तमाः।
तत्रैकत्र सहस्राणि भागे षोड़श संस्थिताः॥
नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः।
ते सर्व्वे सकलैश्वर्य्ययुक्ता ध्यानपरायणाः॥
योगिनो मदमात्सर्य्यदम्भाहङ्कारवर्ज्जिताः।
क्षीणपापा महाभागाः शम्भोः प्रीतिकराः पराः॥
न ते परिग्रहं रागं काङ्क्षन्ति स्म कदाचन।
संसारविमुखाः सर्व्वे यतयो योगतत्पराः॥
ध्यानावस्थं महादेवं परिवार्य्य धृतव्रताः।
ज्ञात्वा परिषदं रुच्या तिष्ठन्ति विगतक्लमाः॥
यदैव परमं ज्योतिश्चिन्तयत्यम्बिकापतिः।
तदैव ते पारिषदाः सर्व्वे संवेष्टयन्ति तम्॥
ते षोड़श समाख्याताः कोटयो ये धृतव्रताः।
सिंहव्याघ्रादिसारूप्या अणिमादिसमायुताः॥*॥
अपरे कामिनः शम्भोः सुनर्म्मसचिवाः स्मृताः।
विचित्ररूपाभरणा जटाचन्द्रार्द्धमण्डिताः॥
हरस्य तुल्या रूपेण विशदा वृषभध्वजाः।
उमासदृशरूपाभिः प्रमदाभिः समागताः॥
विचित्रमाल्याभरणा दिव्यस्रग्गन्धभूषणाः।
उमासहायं क्रीड़न्तमनुगच्छन्ति भूषिताः।
शृङ्गारवेशाभरणा अष्टौ ते कोटयो गणाः॥*॥
अर्द्धनारीश्वराख्यान्ये ह्यर्द्धनारीश्वरं हरम्।
अनुयान्ति महाभागास्तुल्यरूपा हरस्य ये॥
उमासहायो हि यदा रमते स सुखं हरः।
अर्द्धनारीशरीरास्तु द्वारपाला भवन्ति ते॥
आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः।
ध्यानस्थं परिचर्य्यन्ति सलिलादिभिरीश्वरम्॥
नानाशस्त्रधराः शम्भोर्गणास्तु प्रमथाः स्मृताः।
प्रमथ्नन्ति च युद्धेषु युध्यमानान्महाबलान्।
ते वै महाबलाः शूराः संख्यया नवकोटयः॥*॥
अपरे गायनास्तालमृदङ्गपणवादिभिः।
नृत्यन्ति वाद्यं कुर्व्वन्तो गायन्ति मधुरस्वरम्॥
नानारूपधरास्ते वै संख्यया कोटयास्त्रयः।
सततं चानुगच्छन्ति विचरन्तं महेश्वरम्॥
सर्व्वे मायाविनः शूराः सर्व्वे शास्त्रार्थपारगाः।
सर्व्वे सर्व्वत्र सर्व्वज्ञाः सर्व्वे सर्व्वत्रगाः सदा॥
मुहूर्त्तात् सर्व्वभुवनं गत्वा यान्ति पुनः पुनः।
अनिमाद्यष्टकैश्वर्य्ययुक्तास्ते वै महाबलाः॥
अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः।
देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा॥
तेषां संख्या चैककोटिस्ते सर्व्वे बलवत्तराः।
कुर्व्वन्ति हि सदा सेवां हरस्य सततं गणाः॥
विस्मयन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च।
अनुगृह्णन्ति सततं धृतपाशुपतव्रतान्॥
विघ्नांश्च सततं हन्ति योगिनां प्रयतात्मनाम्।
षट्त्रिंशत् कोटयश्चैते हरस्य सकला गणाः॥
वराहगणनाशार्थं हिताय जगतां तथा।
शङ्करस्य च सेवायै समुत्पन्ना इमे गणाः॥
वराहस्य गणान् दृष्ट्वा नरसिंहं तथा हरिम्।
स्वयं सरभरूपः सन् ध्यायन् नादं यतोऽकरोत्॥
तच्छीकराम्बुतो जातास्तत्तेषां बहुरूपता।
क्रूरदृष्ट्या क्रूरयुद्धैः क्रूरकृत्यैरिमान् गणान्॥
वराहस्य हतेत्येवं यतः प्रोक्तं कपर्द्दिना।
ततस्ते क्रूरकर्म्माणः प्रताजाश्च भयङ्कराः॥
न सदा क्रूरकर्म्माणि ते कुर्व्वन्ति महौजसः।
दृष्टिमात्रस्य ते क्रूराः क्रूरक्रूराश्च कार्य्यतः॥
फलं जलं तथा पुष्पं पत्रं मूलं तथैव च।
निवेदितानि भुञ्जन्ति वनपर्व्वतसानुषु॥
आहृत्यापि च भुजन्ति पत्रं पुष्पादिकञ्च यत्।
भवेद्भर्गस्य यद्भोग्यं तद्भोगास्ते महौजसः॥
आमिषं नापि चाश्नन्ति हित्वा चैत्रचतुर्द्दशीम्।
तत्रामिषं हरो भुङ्क्ते चतुर्द्दश्यां मधौ रुदा॥